त्वमग्ने बृहद्वयो दधासि देव दाशुषे। कविर्गृहप-
तिर्युवा। हव्यवाडग्निरजरः पिता नो विभुर्विभावा सु-
दृशीको अस्मे। सुगार्हपत्याः समिषो दिदीह्यस्म-
द्रियक् सं मिमीहि श्रवांसि ॥ ❀ ॥

ये देवा यज्ञहनो यज्ञमुषः पृथिव्यामध्यासते। अ-
ग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम् ॥ यत्ते अग्ने
तेजस्तेनाहं तेजस्वी भूयासं यत्ते अग्ने वर्चस्तेनाहं व-
र्चस्वी भूयसं यत्ते अग्ने हरस्तेनाहꣳ हरस्वी भूयासम् ॥

प्र देवं देव्या धिया भरता जातवेदसम्। हव्या नो वक्षदानुषक्। अयमु ष्य प्र देवयुर्होता यज्ञाय नीयते। रथो न योरभीवृतो घृणीवान् चेतति त्मना। अयमग्निरुरुष्यत्यमृतादिव जन्मनः। सहसश्चित् सहीयान् देवो जीवातवे कृतः। इडायास्त्वा पदे वयं नाभा पृथिव्या अधि। जातवेदो नि धीमह्यग्ने हव्याय वोढवे। अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम्। कुलायिनं घृतवन्तꣳ सवित्रे यज्ञं नय यजमानाय साधु। सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञꣳ सुकृतस्य योनौ। देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धाः। नि होता होतृषदने

विदानस्त्वेषो दीदिवाङ् असदत्सुदक्षः। अदब्धव्रतप्रम-
तिर्वसिष्ठः सहस्रम्भरः शुचिजिह्वो अग्निः। त्वं दूतस्त्वमु-
नः परस्पास्त्वं वस्य आ वृषभ प्रणेता। अग्ने तोकस्य नस्त-
ने तनूनामप्रयुच्छन् दीद्यद्बोधि गोपाः॥ अभि त्वा देव
सवितरीशानं वार्याणाम्। सदाऽवन् भागमीमहे। मही
द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो
भरीमभिः। त्वामग्ने पुष्करादध्यथर्वा निरमन्थत।
मूर्ध्नो विश्वस्य वाघतः। तमु त्वा दध्यङ् ऋषिः पुत्र
ईधे अथर्वणः। वृत्रहणं पुरन्दरम्। तमु त्वा पाथ्यो
वृषा समीधे दस्युहन्तमम्। धनञ्जयं रणे रणे।
उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाऽजनि। धनञ्जयो

रणेरणे । आ यꣳ हस्ते न खादिनꣳ शिशुं जातं न बि-
भ्रति । विशामग्निꣳ स्वध्वरम् । प्र देवं देववीतये भरता
वसुवित्तमम् । आ स्वे योनौ नि षीदतु । आ जातं जात
वेदसि प्रियꣳ शिशीतातिथिम् । स्योन आ गृहपतिम् ।
अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड्-
जुह्वास्यः । त्वꣳ ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता ।
सखा सख्या समिध्यसे । तं मर्जयन्त सुक्रतुं पुरोया-
वानमाजिषु । स्वेषु क्षयेषु वाजिनम् । यज्ञेन यज्ञम-
यजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह
नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः ।

अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यद्याज्ञियम् । तद्दे-
वेभ्यो भरामसि । इषमूर्जमहमित आ दद ऋतस्य
धाम्नो अमृतस्य योनेः । आ नो गोषु विशत्वौषधीषु ज-
हामि सेदिमनिराममीवाम् । अग्ने तव श्रवो वयो महि
भ्राजन्त्यर्चयो विभावसो । बृहद्भानो शवसा वाजमुक्थ्यं
दधासि दाशुषे कवे । इरज्यन्नग्ने प्रथयस्व जन्तुभि-
रस्मे रायो अमर्त्य । स दर्शतस्य वपुषो वि राजसि
पृणक्षि सानासिं रयिम् । ऊर्जो नपाज्जातवेदः
सुशस्तिभिर्मन्दस्व धीतिभिर्हितः । त्वे इषः सं
दधुर्भूरिरेतसश्चित्रोतयो वामजाताः । पावकवर्चाः
शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना । पुत्रः पि-

तरा विचरन्नुपावस्युभे पृणक्षि रोदसी । ऋतावानं
महिषं विश्वचर्षणिमग्निꣳ सुम्नाय दधिरे पुरोजनाः।
श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा।
निष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसे महे।
रातिं भृगूणामुशिजं कविक्रतुं पृणक्षि सानसिꣳ
रयिम् । चितः स्थ परिचित ऊर्ध्वचित श्रयध्वं
तया देवतयाङ्गिरस्वद् ध्रुवाः सीदत ॥